योगवासिष्ठः/प्रकरणम् २ (मुमुक्षुव्यवहारप्रकरणम्)/सर्गः १७

सप्तदशः सर्गः १७

श्रीवसिष्ठ उवाच ।

एवमन्तर्विवेको यः स महानिह राघव ।

योग्यो ज्ञानगिरः श्रोतुं राजेव नयभारतीम् ।। १

अवदातोऽवदातस्य विचारस्य महाशयः ।

जडसङ्गोज्झितो योग्यः शरदिन्दोर्यथा नभः ।। २

त्वमेतया खण्डितया गुणलक्ष्म्या समाश्रितः ।

मनोमोहहरं वाक्यं वक्ष्यमाणमिदं श्रृणु ।। ३

पुण्यकल्पद्रुमो यस्य फलभारानतः स्थितः ।

मुक्तये जायते जन्तोस्तस्येदं श्रोतुमुद्यमः ।। ४

पावनानामुदाराणां परबोधैकदायिनाम् ।

वचसां भाजनं भूत्यै भव्यो भवति नाधमः ।। ५

मोक्षोपायाभिधानेयं संहिता सारसंमिता ।

त्रिंशद्द्वे च सहस्राणि ज्ञाता निर्वाणदायिनी ।। ६

दीपे यथा विनिद्रस्य ज्वलिते संप्रवर्तते ।

आलोकोऽनिच्छतोऽप्येवं निर्वाणमनया भवेत् ।। ७

स्वयं ज्ञाता श्रुता वापि भ्रान्तिशान्त्यैकसौख्यदा ।

आप्रेक्ष्य वर्णिता सद्यो यथा स्वर्गतरङ्गिणी ।। ८

यथा रज्ज्वामहिभ्रान्तिर्विनश्यत्यवलोकनात् ।

तथैतत्प्रेक्षणाच्छान्तिमेति संसारदुःखिता ।। ९

युक्तियुक्तार्थवाक्यानि कल्पितानि पृथक्पृथक् ।

दृष्टान्तसारसूक्तानि चास्यां प्रकरणानि षट् ।। १०

वैराग्याख्यं प्रकरणं प्रथमं परिकीर्तितम् ।

विरागो वर्धते येन सेकेनेव मरौ तरुः ।। ११

[अनुबन्धेन सहितं दिष्टतत्त्वनिरूपणम् ।

सार्धं सहस्रं ग्रन्थस्य यस्मिन्हृदि विचारिते ।

प्रकाशाच्छुद्धतोदेति मणाविव सुमार्जिते ।। १२

मुमुक्षुव्यवहाराख्यं ततः प्रकरणं कृतम् ।

सहस्रमात्रं ग्रन्थस्य युक्तिग्रन्थेन सुन्दरम् ।। १३

स्वभावो हि मुमुक्षूणां नराणां यत्र वर्ण्यते ।

अथोत्पत्तिप्रकरणं दृष्टान्ताख्यायिकामयम् ।। १४

सप्तग्रन्थसहस्राणि विज्ञानप्रतिपादकम् ।

जागती द्रष्टृदृश्यश्रीरहंत्वमितिरूपिणी ।। १५

अनुत्पन्नैवोत्थितेव यत्रेति परिवर्ण्यते ।

यस्मिन्श्रुते जगदिदं श्रोतान्तर्बुध्यतेऽखिलम् ।। १६

सास्मद्युष्मत्सविस्तारं सलोकाकाशपर्वतम् ।

पिण्डग्रहविनिर्मुक्तं निर्भित्तिकमपर्वतम् ।। १७

पृथ्व्यादिभूतरहितं संकल्प इव पत्तनम् ।

स्वप्नोपलम्भभावाभं मनोराज्यवदाततम् ।। १८

गन्धर्वनगरप्रख्यमर्थशून्योपलम्भनात् ।

द्विचन्द्रविभ्रमाभासं मृगतृष्णाम्बुवर्तनम् ।। १९

नौयानलोलशैलाभं सत्यलाभविवर्जितम् ।

चित्तभ्रमपिशाचाभं निर्बीजमपि भासुरम् ।। २०

कथार्थप्रतिभासाभं व्योममुक्तावलीनिभम् ।

कटकत्वं यथा हेम्नि तरङ्गत्वं यथाम्भसि ।। २१

यथा नभसि नीलत्वमसदेवोत्थितं सदा ।

अभित्तिरङ्गरहितमुपलब्धिमनोहरम् ।। २२

स्वप्ने वा व्योम्नि वा चित्रमकर्तृ चिरभासुरम् ।

अवह्निरेव वह्नित्वं धत्ते चित्रानलो यथा ।। २३

दधात्येवं जगच्छब्दरूपार्थमसदात्मकम् ।

तरङ्गोत्पलमालाभं दृष्टनृत्यमिवोत्थितम् ।। २४

चक्रचीत्कारपूर्णस्य जलराशिमिवोद्यतम् ।

शीर्णपत्रं भ्रष्टनष्टं ग्रीष्मे वनमिवारसम् ।। २५

मरणव्यग्रचित्ताभं शिलागृहगुहास्पदम् ।

अन्धकारगुहैकैकनृत्तमुन्मत्तचेष्टितम् ।। २६

प्रशान्ताज्ञाननीहारं विज्ञानशरदम्बरम् ।

समुत्कीर्णमिव स्तम्भे चित्रं भित्ताविवोदितम् ।। २७

पङ्कादिवाभिरचितं सचेतनमचेतनम् ।

ततः स्थितिप्रकरणं चतुर्थं परिकल्पितम् ।। २८

त्रीणि ग्रन्थसहस्राणि व्याख्यानाख्यायिकामयम् ।

इत्थं जगदहंभावरूपस्थितिमुपागतम् ।। २९

द्रष्टृदृश्यक्रमं प्रौढमित्यत्र परिकीर्तितम् ।

दशदिङ्मण्डलाभोगभासुरोऽयं जगद्भ्रमः ।। ३०

इत्थमभ्यागतो वृद्धिमिति तत्रोच्यते चिरम् ।

उपशान्तिप्रकरणं ततः पञ्चसहस्रकम् ।। ३१

पञ्चमं पावनं प्रोक्तं युक्तिसंततिसुन्दरम् ।

इदं जगदहं त्वं च स इति भ्रान्तिरुत्थिता ।। ३२

इत्थं संशाम्यतीत्यस्मिन्कथ्यते श्लोकसंग्रहैः ।

उपशान्तिप्रकरणे श्रुते शाम्यति संसृतिः ।। ३३

प्रभ्रष्टचित्रसेनेव किंचिल्लभ्योपलम्भना ।

शतांशशिष्टा भवति संशान्तभ्रान्तरूपिणी ।। ३४

अन्यसंकल्पचित्तस्था नगरश्रीरिवासती ।

अलभ्यवस्तुपार्श्वस्थस्वप्नप्रयुद्धचिरारवा ।। ३५

शान्तसंकल्पमत्ताभ्रभीषणाशनिशब्दवत् ।

विस्मृतस्वप्नसंकल्पनिर्माणनगरोपमा ।। ३६

भविष्यन्नगरोद्यानप्रसूवन्ध्यामलाङ्गिका ।

तस्या जिह्वोच्यमानोग्रकथार्थानुभवोपमा ।। ३७

अनुल्लिखितचित्रस्य चित्रव्याप्तेव भित्तिभूः ।

परिविस्मर्यमाणार्थकल्पनानगरीनिभा ।। ३८

सर्वर्तुमदनुत्पन्नवनस्पन्दास्फुटाकृतिः ।

भाविपुष्पवनाकारवसन्तरसरञ्जना ।। ३९

अन्तर्लीनतरङ्गौघसौम्यवारिसरित्समा ।

निर्वाणाख्यं प्रकरणं ततः षष्ठमुदाहृतम् ।। ४०

शिष्टो ग्रन्थः परीमाणं तस्य ज्ञानमहार्थदः ।

बुद्धे तस्मिन्भवेच्छ्रेयो निर्वाणं शान्तकल्पनम् ।। ४१

अचेत्यचित्प्रकाशात्मा विज्ञानात्मा निरामयः ।

परमाकाशकोशाच्छः शान्तसर्वभवभ्रमः ।। ४२

निर्वापितजगद्यात्रः कृतकर्तव्यसुस्थितः ।

समस्तजनतारम्भवज्रस्तम्भो नभोनिभः ।। ४३

विनिगीर्णयथासंख्यजगज्जालातितृप्तिमान् ।

आकाशीभूतनिःशेषरूपालोकमनस्कृतिः ।। ४४

कार्यकारणकर्तृत्वहेयादेयदृशोज्झितः ।

सदेह इव निर्देहः ससंसारोऽप्यसंसृतिः ।। ४५

चिन्मयो घनपाषाणजठरापीवरोपमः ।

चिदादित्यस्तपँल्लोकानन्धकारोपरोपमम् ।। ४६

परप्रकाशरूपोऽपि परमान्ध्यमिवागतः ।

रुद्धसंसृतिदुर्लीलः प्रक्षीणाशाविषूचिकः ।। ४७

नष्टाहंकारवेतालो देहवानकलेवरः ।

कस्मिंश्चिद्रोमकोट्यग्रे तस्येयमवतिष्ठते ।

जगल्लक्ष्मीर्महामेरोः पुष्पे क्वचिदिवालिनी ।। ४८

परमाणौ परमाणौ चिदाकाशः स्वकोटरे ।

जगल्लक्ष्मीसहस्राणि धत्ते कृत्वाथ पश्यति ।। ४९

विततता हृदयस्य महामते-

र्हरिहराब्जजलक्षशतैरपि ।

तुलनमेति न मुक्तिमतो यतः

प्रवितताऽस्ति निरुत्तमवस्तुनः ।। ५०

इत्यार्षे श्रीवासिष्ठमहारामायणे वाल्मीकीये मुमुक्षुव्यवहारप्रकरणे ग्रन्थसंख्यादिवर्णनं नाम सप्तदशः सर्गः ।। १७ ।।